# BHAGAVADGITA Chapter 14

## With transliteration and anvaya

श्री भगवानुवाच

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ।।14.1 ।।

śrī bhagavānuvāca

param bhūya: pravakṣyāmi jñānānāṃ jñānamuttamam .

yajjñātvā munaya: sarvē parāṃ siddhimitō gatā: ..14.1 ..

**Anvaya**

श्री भगवान उवाच

(हे अर्जुन), भूयः (ते) ज्ञानानाम् उत्तमम् परं ज्ञानं प्रवक्ष्यामि। यत् (ज्ञानम्) ज्ञात्वा सर्वे मुनयः इतः परां सिद्धिं गताः ।।14.1।।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।।14.2 ।।

idam jñānam upāśritya mama sādharmyamāgatā: .

sargē'pi nōpajāyantē pralayē na vyathanti ca ..14.2 ..

**Anvaya**

(ते मुनयः) इदं ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः। (तस्मात् ते) सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ।।14.2।।

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।

संभवः सर्वभूतानां ततो भवति भारत ।।14.3 ।।

mama yōnirmahadbrahma tasmin garbhaṃ dadhāmyaham .

sambhava: sarvabhūtānāṃ tatō bhavati bhārata ..14.3 ..

**Anvaya**

(हे) भारत, मम योनिः महत् ब्रह्म (अस्ति)। तस्मिन् अहं गर्भं दधामि।। ततः सर्वभूतानां संभवः भवति।।14.3।।

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।

तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ।।14.4 ।।

sarvayōniṣu kauntēya mūrtaya: sambhavanti yā: .

tāsāṃ brahma mahadyōni: ahaṃ bījaprada: pitā ..14.4 ..

**Anvaya**

(हे) कौन्तेय, सर्वयोनिषु याः मूर्तयः सम्भवन्ति, तासां ब्रह्म महद्योनिः (अस्ति) अहं बीजप्रदः पिता (अस्मि) ।।14.4।।

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।

निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।14.5 ।।

sattvaṃ rajastama iti guṇā: prakṛtisambhavā: .

nibadhnanti mahābāhō dēhē dēhinam-avyayam ..14.5 ..

**Anvaya**

(हे) महाबाहो, सत्त्वं रजः तमः प्रकृतिसंभवाः गुणाः इति (विद्धि)। (ते गुणाः) अव्ययम् देहिनम् देहे निबध्नन्ति ।।14.5।।

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।

सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ।।14.6 ।।

tatra sattvaṃ nirmalatvāt prakāśakamanāmayam .

sukhasaṅgēna badhnāti jñānasaṅgēna cānagha ..14.6 ..

**Anvaya**

(हे) अनघ, तत्र सत्त्वं निर्मलत्वात् प्रकाशकम् (च) अनामयम् (सन्) सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति।।14.6।।

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।

तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।।14.7 ।।

rajō rāgātmakaṃ viddhi tṛṣṇāsaṅgasamudbhavam .

tannibadhnāti kauntēya karmasaṅgēna dēhinam ..14.7 ..

**Anvaya**

(हे) कौन्तेय, रजः रागात्मकं (तथा) तृष्णासङ्गसमुद्भवम्  (इति त्वं) विद्धि। तत् कर्मसङ्गेन देहिनम् निबध्नाति ।।14.7।।

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।

प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ।।14.8 ।।

**tamastvajñānajaṃ viddhi mōhanaṃ sarvadēhinām .**

**pramādālasyanidrābhi: tannibadhnāti bhārata ..14.8 ..**

**Anvaya**

(हे) भारत, तमः तु अज्ञानजम् (तथा) मोहनम् (इति त्वं) विद्धि। तत् प्रमादालस्यनिद्राभिः सर्वदेहिनां निबध्नाति।।14.8।।

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।

ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ।।14.9 ।।

**sattvaṃ sukhē sañjayati raja: karmaṇi bhārata .**

**jñānamāvṛtya tu tama: pramādē sañjayatyuta ..14.9 ..**

**Anvaya**

(हे) भारत, सत्त्वं सुखे सञ्जयति, रजः कर्मणि (सञ्जयति), उत तमः तु ज्ञानम् आवृत्य प्रमादे सञ्जयति।।14.9।।

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।

रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।।14.10 ।।

**rajastamaścābhibhūya sattvaṃ bhavati bhārata .**

**raja: sattvaṃ tamaścaiva tama: sattvaṃ rajastathā ..14.10 ..**

**Anvaya**

(हे) भारत, सत्त्वं रजः तमः च अभिभूय भवति। एव रजः सत्त्वं तमः च (अभिभूय भवति) तथा तमः सत्त्वं रजः (च)।।14.10।।

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।

ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ।।14.11 ।।

**sarvadvārēṣu dēhē'smin prakāśa upajāyatē .**

**jñānaṃ yadā tadā vidyād-vivṛddhaṃ sattvamityuta ..14.11 ..**

**Anvaya**

**यदा अस्मिन् देहे सर्वद्वारेषु ज्ञानम् (तथा) प्रकाश उपजायते , तदा उत सत्त्वं विवृद्धं इति विद्यात् ।।14.11 ।।**

**लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।**

**रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ।।14.12 ।।**

**lōbha: pravṛttirārambha: karmaṇāmaśama: spṛhā .**

**rajasyētāni jāyantē vivṛddhē bharatarṣabha ..14.12 ..**

**Anvaya**

**(हे) भरतर्षभ, रजसि विवृद्धे लोभः प्रवृत्तिः आरम्भः कर्मणाम् अशमः (तथा) स्पृहा, एतानि जायन्ते।।14.12।।**

**अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।**

**तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ।।14.13 ।।**

**aprakāśō'pravṛttiśca pramādō mōha ēva ca .**

**tamasyētāni jāyantē vivṛddhē kurunandana ..14.13 ..**

**Anvaya**

**(हे) कुरुनन्दन, तमसि विवृद्धे अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च, एतानि जायन्ते ।।14.13।।**

**यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।**

**तदोत्तमविदां लोकानमलान्प्रतिपद्यते ।।14.14 ।।**

**yadā sattvē pravṛddhē tu pralayaṃ yāti dēhabhṛt .**

**tadōttamavidāṃ lōkān amalānpratipadyatē ..14.14 ..**

**Anvaya**

**यदा देहभृत् सत्त्वे प्रवृद्धे तु प्रलयं याति, तदा उत्तमविदान् अमलान् लोकान् प्रतिपद्यते ।।14.14।।**

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।

तथा प्रलीनस्तमसि मूढयोनिषु जायते ।।14.15 ।।

rajasi pralayaṃ gatvā karmasaṅgiṣu jāyatē .

tathā pralīnastamasi mūḍhayōniṣu jāyatē ..14.15 ..

**Anvaya**

रजसि प्रलयं गत्वा (देहभृत्) कर्मसङ्गिषु जायते, तथा तमसि प्रलीनः मूढयोनिषु जायते।।14.15।।

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।

रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ।।14.16 ।।

karmaṇa: sukṛtasyāhu: sāttvikaṃ nirmalaṃ phalam .

rajasastu phalaṃ du:kham ajñānaṃ tamasa: phalam ..14.16 ..

**Anvaya**

सुकृतस्य कर्मणः सात्त्विकं निर्मलं फलं (इति ऋषयः) आहुः। तु रजसः फलम् दुःखम् तमसः फलम् अज्ञानम् (इति आहुः)।।14.16।।

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।

प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ।।14.17 ।।

sattvātsañjāyatē jñānaṃ rajasō lōbha ēva ca .

pramādamōhau tamasō bhavatō'jñānamēva ca ..14.17 ..

**Anvaya**

सत्त्वात् ज्ञानम् सञ्जायते, रजसः च लोभः एव तमसः च प्रमादमोहौ अज्ञानम् एव भवतः।।14.17।।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।

जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।।14.18 ।।

ūrdhvaṃ gacchanti sattvasthā madhyē tiṣṭhanti rājasā: .

jaghanyaguṇavṛttisthā adhō gacchanti tāmasā: ..14.18 ..

**Anvaya**

सत्त्वस्थाः ऊर्ध्वं गच्छन्ति, राजसाः मध्ये तिष्ठन्ति (तथा) जघन्यगुणवृत्तिस्थाः तामसाःअधः गच्छन्ति।।14.18।।

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।

गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ।।14.19 ।।

nānyaṃ guṇēbhya: kartāraṃ yadā draṣṭānupaśyati .

guṇēbhyaśca paraṃ vētti madbhāvaṃ sō'dhigacchati ..14.19 ..

**Anvaya**

यदा द्रष्टा गुणेभ्यः अन्यं कर्तारं न अनुपश्यति च गुणेभ्यः परं वेत्ति (तदा) सः मद्भावम् अधिगच्छति ।।14.19।।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।

जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ।।14.20 ।।

guṇānētānatītya trīn dēhī dēhasamudbhavān.

janmamṛtyu jarā duhkhaiḥ vimuktō'mṛtamaśnutē ..14.20 ..

**Anvaya**

देही एतान् देहसमुद्भवान् त्रीन् गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः (सन्) अमृतम् अश्नुते।।14.20।।

अर्जुन उवाच

कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।

किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ।।14.21 ।।

arjuna uvāca

kairlingaistrīnguṇānētān-atītō bhavati prabhō .

kimācāraḥ katham chaitān trīnguṇānativartatē ..14.21 ..

**Anvaya**

अर्जुन उवाच

(हे) प्रभो, कैः लिङ्गैः (साधकः) एतान् त्रीन् गुणान् अतीतः भवति? (तस्य) किम् आचारः च कथं (साधकः) एतान् त्रीन् गुणान् अतिवर्तते? ।।14.21 ।।

श्री भगवानुवाच

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।

न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ।।14.22 ।।

śrī bhagavānuvāca

prakāśam ca pravṛttim ca mōhamēva ca pāṇḍava .

na dvēṣṭi sampravṛttāni na nivṛttāni kāṅkṣati ..14.22..

**Anvaya**

श्री भगवानुवाच

(हे) पाण्डव, (गुणातीतः) प्रकाशं च प्रवृत्तिं च मोहं च एव सम्प्रवृत्तानि न द्वेष्टि (तथा) निवृत्तानि न काङ्क्षति ।।14.22।।

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।

गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ।।14.23 ।।

udāsīnavadāsīnō guṇairyō na vichālyatē .

guṇā vartanta ityēva yō'avatiṣṭhati nēṅgatē ..14.23..

**Anvaya**

(सः) यः उदासीनवत् आसीनः (भूत्वा) गुणैः न विचाल्यते (तथा) गुणाः एव वर्तन्ते इति (विदित्वा) (स्वस्वरूपे) अवतिष्ठति न इङ्गते (च)।।14.23 ।।

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।

तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।।14.24 ।।

samaduhkhasukhaḥ svasthaḥ samalōṣṭāśmakāñcanaḥ .

tulyapriyāpriyō dhīraḥ tulyanindātmasaṃstutiḥ..14.24..

**Anvaya**

(सः ) धीरः समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः तथा तुल्यनिन्दात्मसंस्तुतिः।।14.24।।

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।

सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।14.25 ।।

mānāpamānayōs-tulyaḥ tulyō mitrāripakṣayōḥ .

sarvārambhaparityāgī guṇātītaḥ sa ucyatē ..14.25..

**Anvaya**

(यः) मानापमानयोः तुल्यः मित्रारिपक्षयोः तुल्यः सर्वारम्भपरित्यागी (च) सः गुणातीतः (इति) उच्यते ।।14.25।।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।

स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।14.26 ।।

māṃ ca yō'vyabhicārēṇa bhaktiyōgēna sēvatē .

sa guṇān samatītyaitān brahmabhūyāya kalpatē..14.26 ..

**Anvaya**

यः च माम् अव्यभिचारेण भक्तियोगेन सेवते, सः एतान् गुणान् समतीत्य ब्रह्मभूयाय कल्पते।।14.26।।

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च ।

शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।।14.27 ।।

brahmaṇō hi pratiṣṭhā'ham amṛtasyāvyayasya ca .

śāśvatasya ca dharmasya sukhasyaikāntikasya ca..14.27..

**Anvaya**

अहं अमृतस्य च अव्ययस्य शाश्वतस्य च धर्मस्य एकान्तिकस्य सुखस्य च ब्रह्मणः प्रतिष्ठा (अस्मि) हि।।14.27।।